PP5F62

# 14. पण्डितजवाहरलालनेहरुः



जवाहरलालनेहरुः महोदयः स्वतन्त्रभारतवर्षस्य प्रथमः प्रधानमन्त्री आसीत् । सः स्वतंत्रतासंग्रामे स्वेच्छयागतः । तदा महात्मागांधी अहिंसकान्दोलनस्य नेतृत्वं करोतिस्म ।

अस्य जनकः श्री मोतीलालनेहरुः मातास्वरूपरानी, कमलाधर्मपत्नी, इन्दिरा च एकसुता, विजयलक्ष्मीपण्डित भगिनी आसीत्। 'आंग्लदेशे' 'कैम्ब्रिज' इति विश्वविद्यालये शिक्षां समाप्य सः स्वदेशे समागतः । तदा प्रभृति सः स्वजीवनस्य लोकार्पणम् अकरोत् ।

जवाहरलालः कृपालुः, सहृदयः, वाग्मी, विधिज्ञः च आसीत्। महात्मागांधी यदि राष्ट्रपिता कथ्यते तर्हि नेहरुः राष्ट्रनिर्माता ।

नेहरुः लेखकः अपि आसीत् । तेन लिखितानि बहूनि पुस्तकानि सन्ति । नेहरुसाहित्यं लोकप्रियमस्ति । अद्यापि सर्वे तानि पुस्तकानि पठन्ति ज्ञानसमृद्धाः च भवन्ति।

सः बहुवारं कारागारं अपि अगच्छत् । 1942 खिष्टाब्दे प्रस्तावः पारितः-'भारतं त्यज' अयं प्रस्तावः देशे सर्वत्र प्रसरितः । अस्मिन् आन्दोलने नेहरुःपरिवारस्य सक्रियः सहयोगः आसीत् । बालानां चाचानेहरु अतिप्रियः।

## शब्दार्थाः

| | | |
|---|---|---|
| आसीत् | - | था |
| स्वेच्छया | - | अपनी इच्छा से |
| आगतः | - | आ गये |
| नेतृत्वम् | - | संचालन |
| सुता | - | पुत्री |
| भगिनी | - | बहन |
| समाप्य | - | समाप्त करके |
| प्रभृति | - | लेकर |
| लोकार्पणम् | - | देश के लिये अर्पित |
| वाग्मी | - | भाषणकला में निपुण |

| | | |
|---|---|---|
| कृपालुः | - | दयालु |
| सहृदयः | - | स्वच्छ हृदय वाला |
| विधिज्ञः | - | विधिशास्त्र के ज्ञाता |
| कारागारः | - | जेल |
| अपि | - | भी |
| ख्रिष्टाब्दे | - | ईस्वी सन् में |
| भारतं त्यज | - | भारत छोड़ो |
| प्रसरितः | - | फैल गया |

## अभ्यासः

### 1. निम्नलिखित प्रश्नों के उत्तर संस्कृत भाषा में लिखिए-

1. जवाहरलालस्य पितुः किं नाम ?
2. कमला कस्य धर्मपत्नी आसीत् ?
3. स्वाधीनभारते प्रथमः प्रधानमन्त्री कः आसीत् ?
4. स्वरूपरानी कस्य माता आसीत् ?
5. कस्य सुता इन्दिरा आसीत् ?
6. भारतं त्यज प्रस्तावः कदा पारितः ?

### 2. संस्कृत में अनुवाद कीजिए-

1. बालक पुस्तक पढ़ता है ।
2. वह आता है ।
3. तुम कहाँ जाते हो ।
4. श्री गुरु को प्रणाम ।
5. हम दोनों विद्यालय जाते हैं ।

PPEB7P

### 3. संधि विच्छेद कीजिए-

1. अद्यापि
2. समागतः
3. लोकार्पणम्

### 4. निम्नलिखित शब्दों की सभी विभक्तियों में कारक रचना लिखिए-

1. पुस्तक
2. विद्यालय